# RTET 2012 Level-I

## भाषा – II : संस्कृतम्

**अत्र त्रिंशत् प्रश्नानि सन्ति। सर्वे प्रश्ना: समाधेया:।**

**प्रस्तुतं पद्यांश सम्यक् पठित्वा प्रश्न संख्या 61 त: 67 पर्यन्तं प्रश्नानाम् उत्तराणि लेखनीयानि–**

सत्यानृता च परुषा प्रियवादिनी च,
हिंस्त्रा दयालुरपि चार्थपरा वदांन्या।
नित्यव्यया प्रचुरनित्यधनागमा च्,
वाराङ्गनेव नृपनीतिरनेकरूपा।।

**61. का अनेकरूपा विद्यते?**

(अ) परुषा (ब) नृपनीति:
(स) वाराङ्गना (द) वदान्या। (ब)

**62. "प्रियवादिनी" इत्यत्र क: प्रत्यय:?**

(अ) णिनि (ब) इनि
(स) इञ् (द) नो। (अ)

**63. 'नित्यव्यया' इत्यत्र समास: क:?**

(अ) कर्मधारय: (ब) अव्ययीभाव:
(स) बहुव्रीहि: (द) द्विगु:। (स)

**64. 'वाराङ्गनेव' इत्यत्र क: सन्धि:?**

(अ) यण् सन्धि: (ब) गुण सन्धि:
(स) दीर्घ सन्धि: (द) अयादि सन्धि:। (ब)

**65. श्लोकेऽस्मिन् छन्द: किम्?**

(अ) उपेन्द्रवज्रा (ब) वंशस्थम्

(स) प्रहर्षिणी (द) वसन्ततिलका। (द)

**66. 'सत्या' इति पदस्य विलोमं पदं किं भवेत्?**

(अ) प्रियवादिनी (ब) परुषा

(स) अनृता (द) वदान्या। (स)

**67. 'दयालुरपि' इत्यत्र क: सन्धि-विच्छेद :?**

(अ) दयालुर + अपि (ब) दयालु: + अपि

(स) दयालुस् + अपि (द) दया + आलुर् + अपि। (ब)

**68. मूल्याङ्कनं कतिविधम्?**

(अ) त्रिविधम् (ब) एकविधम्

(स) द्विविधम् (द) चतुर्विधम्। (स)

**69. संस्कृतभाषाशिक्षणे सर्वप्रथमं भाषाकौशलं विद्यते–**

(अ) श्रवणनम् (ब) सम्भाषणम्

(स) पठनम् (द) लेखनम्। (अ)

**70. 'उदाहरणानि प्रस्तूय नियमस्य कथनम्' इति क: विधि:?**

(अ) सूत्रविधि: (ब) निगमनविधि:

(स) व्याख्याविधि: (द) आगमनविधि:। (द)

**71. प्राचीनतम् विधि: क:?**

(अ) पारायणविधि: (ब) व्याख्याविधि:

(स) सूत्रविधि: (द) आगमनविधि:। (अ)



www.gkabhi.in

**72. शिक्षणं रुचिकरं कथं स्यात्?**

(अ) विधिभि: (ब) कौशलै:

(स) पुस्तकै: (द) दृश्यश्रव्यसाधनै:। (द)

**प्रस्तुतं गद्याशम् आधारीकृत्यं निम्नलिखित: प्रश्न सं. 73 त: 79 पर्यन्तं प्रश्ना: समाधेया:–**

अथ का नाम संस्कृति:? मनस: आत्मन: च संस्कार: परिष्कार: इति संस्कृति:। संस्कृति: मन: निर्मलं करोति। विश्वसंस्कृतिषु भारतीय संस्कृति: प्राचीनतमा। भारतीय संस्कृते: आदर्शवाक्यानि सन्ति– 'सर्वे भवन्तु सुखिन:', 'वसुधैवकुटुम्बकम्', 'आत्मवत् सर्वभूतेषु', 'अहिंसा परमोधर्म:' 'मातृवत परदारेषु परद्रव्येषु लोष्ठवत्' इत्यादीनि। भारतीय संस्कृति: धर्मप्रधाना, वर्णाश्रम व्यवस्थायुक्ता चास्ति। कर्मफलं, पुनर्जन्म, मोक्षवाद: च अस्या: प्रमुखा: सिद्धान्ता: सन्ति। सत्यस्य, त्यागस्य, अहिंसाया: च अत्र महत्त्वं वर्तते। विश्वहितस्य मूलभूता: भावना: भारतीयसंस्कृतौ उपलभ्यन्ते।

**73. सर्वभूतेषु कीदृश: व्यवहार: करणीय:?**

(अ) मातृवत् (ब) आत्मवत्

(स) पितृवत् (द) लोष्ठावत्। (ब)

**74. 'वसुधैव' इत्यत्र सन्धि विच्छेद: कार्य:–**

(अ) वसुधा + इव (ब) वसुधा +ऐव

(स) वसुधा + एव (द) वसुधा + ईव। (स)

**75. 'लोष्ठवत्' व्यवहार: कुत्र प्रदर्शनीय:?**

(अ) परदारेषु (ब) सर्वभूतेषु

(स) परद्रव्येषु (द) सर्वत्र। (स)

**76. 'महत्त्वम्' इत्यत्र क: प्रत्यय:?**

(अ) तमप् (ब) तत्

(स) क्त (द) त्व। (द)

**77. 'संस्कृति' इत्यत्र क: उपसर्ग:?**

(अ) सह (ब) सम्

(स) सु (द) स:। (ब)

**78. 'कर्मफलम्' इत्यत्र क: समास:?**

(अ) तत्पुरुष: (ब) कर्मधारय:

(स) बहुव्रीहि: (द) द्वन्द्व:। (अ)

**79. "संस्कृति: मन: निर्मलं करोति" वाक्यामिदं लङ् लकारे परिवर्तयत–**

(अ) संस्कृति मन: निर्मलं करिष्यति

(ब) संस्कृति: मन: निर्मलम् अकरोत्

(स) संस्कृति: मन: निर्मलं कर्यात्

(द) संस्कृति: मन: निर्मलम् अकुरुत। (ब)

**80. परम्परागतसहायकोपकरणम् अस्ति–**

(अ) दूरदर्शनम् (ब) श्यामपट्ट:

(स) मानचित्रम् (द) आकाशवाणी। (ब)

**81. कस्यापि नगरस्य भौगलिकीं स्थितिं बोधयितुं कीदृशस्य पाठ्योपकरणस्य प्रयोग: करणीय:?**

(अ) मानचित्रस्य (ब) पत्रकस्य

(स) रेखाचित्रस्य (द) पुस्तकस्य। (अ)

**82. संस्कृतभाषा सर्वाधिक सफला भाषा कस्य कृति वर्तते?**

(अ) दूरदर्शनस्य (ब) चलचित्रस्य

(स) संगणकस्य (द) आकाशवाण्या:। (स)

**83. अतिलघुत्तरात्मकप्रश्नानाम् उत्तरसीमा स्यात्–**

(अ) पृष्ठमेकम् (ब) वाक्यद्वयम्

(स) पञ्चवाक्यानि (द) एकं वाक्यम्। (द)

**84. निबन्धात्मक परीक्षापेक्षया का परीक्षा विश्वसनीया कथ्यते?**

(अ) वस्तुनिष्ठपरीक्षा (ब) भाषणपरीक्षा

(स) साक्षात्कारपरीक्षा (द) लिखितपरीक्षा। (अ)

**85. अधोलिखितस्य वाक्यस्य संस्कृते अनुवादं कुरुत– वह, मैं और तुम विद्यालय जा रहे हैं।**

(अ) स: त्वम् अहं च विद्यालयं गच्छन्ति

(ब) स: अहं त्वं च विद्यालयं गच्छाम:।

(स) स: अहं त्वं च विद्यालयं गच्छथ

(द) स: अहं त्वं च विद्यालयं गच्छाम:। (ब)

**86. 'ऋ' वर्णस्य उच्चारणस्थानं किम्?**

(अ) मूर्धा (ब) दन्ता:

(स) कण्ठ: (द) तालु। (अ)

**87. वाक्यमिदं संशोधयत–**

**"त्वं भिक्षुकं धनं यच्छसि।"**

(अ) त्वं भिक्षुकस्य धनं यच्छति (ब) त्वं भिक्षुकाय धनं यच्छसि

(स) त्वं भिक्षुकेण धनं यच्छसि (द) त्वं भिक्षुके धनं यच्छसि। (ब)

**88. निम्नलिखितसूक्ते: समुचितपदेन रिक्त स्थानं पूरयत–**
**स्वदेशे पूज्यते राजा ................ सर्वत्र पूज्यते।**

(अ) विद्या (ब) धनम्

(स) विद्वान् (द) मूर्ख:। (स)

**89. "अहं पुस्तकानि पठानि" वाक्यस्यास्य वाच्यपरिवर्तनं कुरुत–**

(अ) मया पुस्तकान् पठ्यते (ब) मया पुस्तकानि पठ्यते

(स) मया पुस्तकानि पठ्यन्ते (द) अहं पुस्तकै: पठ्यते। (*)

**90. 'व' कारस्य उच्चारण - स्थानं किम्?**

(अ) दन्तोष्ठ: (ब) कण्ठोष्ठ:

(स) तालु - ओष्ठ: (द) नासिका - ओष्ठ:। (अ)

❑❑❑

For Indian GK, Rajasthan GK, Subjective Knowledge Educational Psychology, Sanskrit, Hindi etc.

Follow Website → www.gkabhi.in

Subcribe Youtube → www.youtube.com/ekanshstudy

Subcribe Youtube → https://www.youtube.com/c/GKAbhi